# सुन्दरकाण्ड विंशः सर्गः (२०) - ॥ रावण प्रर्थणा ॥

स तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् ।
साकारैर् मधुरैर् वाक्यैर् न्यदर्शयत रावणः ॥ १ ॥

मां दृष्ट्वा नागनासोरु गूहमाना स्तनोदरम् ।
अदर्शन मिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥

कामये त्वां विशालाक्षि बहु मन्यस्व मां प्रिये ।
सर्वाङ्ग गुण सम्पन्ने सर्वलोक मनोहरे ॥ ३ ॥

नेह केचिन् मनुष्या वा राक्षसाः कामरूपिणः ।
व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥

स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ।
गमनं वा परस्त्रीणां हरणं सम्प्रमथ्य वा ॥ ५ ॥

एवं चैत दकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ।
कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥ ६ ॥

देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ।
प्रणयस्व च तत्त्वेन मैवं भूः शोक लालसा ॥ ७ ॥

एकवेणी धरा शय्या ध्यानम् मलिन मम्बरम् ।
अस्थानेऽप् युपवासश्च नैतान् यौपयिकानि ते ॥ ८ ॥

विचित्राणि च माल्यानि चन्दनान् यगरूणि च ।
विविधानि च वासांसि दिव्यान् याभरणानि च ॥ ९ ॥

महार्हाणि च पानानि शयनान् यासनानि च ।
गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि ॥ १० ॥

स्त्री रत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् ।
मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥

इदं ते चारु सञ्जाते यौवनं व्यतिवर्तते ।
यदतीतं पुनर्नैति स्रोतः शीघ्र मपामिव ॥ १२ ॥

त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ।
न हि रूपोपमा त्वन्या तवास्ति शुभ दर्शने ॥ १३ ॥

त्वां समासाद्य वैदेहि रूप यौवन शालिनीम् ।
कः पुमानति वर्तेत साक्षादपि पितामहः ॥ १४ ॥

यद्यत् पश्यामि ते गात्रं शीतांशु सदृशानने ।
तस्मिंस् तस्मिन् पृथु श्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥

भव मैथिलि भार्या मे मोहमेनं विसर्जय ।
बह्वीना मुत्तम स्त्रीणा ममाग्र महिषी भव ॥ १६ ॥

लोकेभ्यो यानि रत्नानि सम्प्रमथ्या हृतानि वै ॥ १७ ॥

तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते ।
विजित्य पृथिवीं सर्वां नाना नगर मालिनीम् ॥ १८ ॥

जनकाय प्रदास्यामि तव हेतोर् विलासिनि ।
नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ १९ ॥

पश्य मे सुमहद् वीर्य मप्रति द्वन्द्व माहवे ।
असकृत् सम्युगे भग्ना मया विमृदित ध्वजाः ॥ २० ॥

अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ।
इच्छया क्रियता मद्य प्रतिकर्म तवोत्तमम् ॥ २१ ॥

सप्रभाण्यव सज्यन्तां तवाङ्गे भूषणानि च ।
साधु पश्यामि ते रूपं सम्युक्तं प्रति कर्मणा ॥ २२ ॥

प्रतिकर्माभि सम्युक्ता दाक्षिण्येन वरानने ।
भुङ्क्ष्व भोगान् यथाकामं पिब भीरु रमस्व च ॥ २३ ॥

यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ।
रमस्व मयि विस्रब्धा धृष्ट माज्ञापयस्व च ॥ २४ ॥

मत् प्रसादा ल्ललन्त्याश्च ललन्तां बान्धवास्तव ।
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च मे ॥ २५ ॥

किं करिष्यसि रामेण सुभगे चीर वाससा ।
निक्षिप्त विजयो रामो गतश्रीर् वन गोचरः ॥ २६ ॥

व्रती स्थण्डिल शायी च शङ्के जीवति वा न वा ।
न हि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते ॥ २७ ॥

पुरो बलाकै रसितैर् मेघैर् ज्योत्स्ना मिवावृताम् ।
न चापि मम हस्तात्त्वां प्राप्तु मर्हति राघवः ॥ २८ ॥

हिरण्यकशिपुः कीर्ति मिन्द्र हस्त गतामिव ।
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ २९ ॥

मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ।
क्लिष्ट कौशेय वसनां तन्वी मप्य नलङ्कृताम् ॥ ३० ॥

त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ।
अन्तःपुर निवासिन्यः स्त्रियः सर्व गुणान्विताः ॥ ३१ ॥

यावन्त्यो मम सर्वासा मैश्वर्यं कुरु जानकि ।
मम ह्यसितकेशान्ते त्रैलोक्य प्रवराः स्त्रियः ॥ ३२ ॥

तास्त्वां परिचरिष्यन्ति श्रिय मप्सरसो यथा ।
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ ३३ ॥

तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ।
न रामस् तपसा देवि न बलेन न विक्रमैः ।
न धनेन मया तुल्यस् तेजसा यशसाऽपि वा ॥ ३४ ॥

पिब विहर रमस्व भुङ्क्ष्व भोगान्
धननिचयं प्रदिशामि मेदिनीं च ।
मयि लल ललने यथासुखं त्वं
त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥

कुसुमित तरु जाल सन्ततानि
भ्रमर युतानि समुद्र तीरजानि ।
कनक विमल हार भूषिताङ्गी
विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥